Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ शक्तिपञ्चाक्षरविधानमुच्यते —

वामदेव ऋषिः । पंक्तिः छन्दः । सदाशिवो देवता । ओं बीजम् । ह्रीं शक्तिः । अङ्गानि तु ओं ह्रां हृत् । ओं ह्रीं शिरः । इत्यादिपञ्चाक्षरवर्णैः । ध्यानम् —

वन्दे हरं वरदशूलकपालहस्तं साभीतिमद्रिसुतयोज्ज्वलदेहकान्तिम् ।
वामोरुपीठगतया निजवामहस्तन्यस्तारुणोत्पलरुजापरिरब्धदेहम् ॥

ह्रीं ओं नमः शिवाय ह्रीं । इति मन्त्रः । ऐश्वर्यफलप्रधानोऽयं मन्त्रः । चतुर्लक्षजपः । तावत्सहस्रं त्रिमधुरसिक्ताभिः नृपतरुसमिद्भिर्जुहुयात् पुरश्चरणार्थम् ॥

अथ पूजा —

प्रासादोक्तपीठे शिवं समावाह्य समर्चयेत् । अङ्गैः प्रथमावृतिः । हृल्लेखायै० गगनायै० रक्तायै० करालिकायै० महोच्छुष्मायै० ५ इति कोणेष्व-

ग्रतश्च द्वितीयावृतिः । वृषाय० क्षेत्रपालाय० चण्डेश्वराय० दुर्गायै० गुहाय० नन्दिने० गणपाय० सैन्यपाय० ८ इति तृतीयावृतिः । मातृभिश्चतुर्थी । इन्द्रादिभिः पञ्चमी ॥